National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 215-218
© 2025 NJHSR
www.sanskritarticle.com

**सौरभ राउतः**
शोधच्छात्रः, व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सौरभ राउतः**
शोधच्छात्रः, व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# क्रियापदार्थविमर्शः

**सौरभ राउतः**

**DOI:** https://doi.org/10.5281/zenodo.17699187

**प्रस्तावना-**

नामाख्यातयोर्ग्रहणं सर्वैराचार्यैः येन केनापि प्रकारेण कृतमस्ति। तयोश्च प्रामुख्यं भजत आख्यातम्।वैयाकरणाः नैरुक्ताश्च सर्वेषां शब्दानामुत्पत्तिर्धातोः भवतीति अभिप्रयन्ति। तच्च निरुक्तकारः स्पष्टयति-"नामान्याख्यातजानि इति शाकटायनो नैरुक्ताश्च[1]" व्याकरणदर्शनानुसारेण वाक्ये किया-साधन-सम्बन्धादितत्त्वानि भवन्ति। तत्र क्रियाया एव मुख्यत्वं निःसन्देहम्। अत्र प्रमाणम्- "साधने तव्यदादयो विधीयन्ते, साधनञ्च क्रियायाः। क्रियाभावात् साधनाभावः" इति भाष्यकारः[2]। "कियापेक्षत्वं साधनस्य" इति हेलाराजोऽपि।[3] एवमेव "शक्तिरेव साधनं न तु शक्तिमद् द्रव्यम्"[4]। इति हेलाराजकथनेन द्रव्यमेव शक्त्याविष्टं साधनं लकारवाच्यं सिध्यति। देवदत्तः पचतीत्यत्र लकारवाच्यं शक्त्याविष्ट साधनं कर्तृकारकं पदान्तरे देवदत्तपदेऽभिव्यज्यते। एतावता साधनसम्बन्धयोः पदार्थत्वज्ञानं क्रियासमभिव्याहृतमेवेति निश्चीयते।अतोऽभ्यर्हितत्वाद् आदौ क्रिया तच्छास्त्रीयलक्षणञ्च विचार्य प्रस्तूयते।

**कूटशब्दाः- क्रिया,व्यापारः,धातुः,आख्यातम्,**

तत्रापि किया कः पदार्थः? इत्यत्र वाक्यपदीयानुसारं तद्विवेचनं चिकीर्षद्भिर्वाक्यपदीयग्रन्थ-योजनाऽपि 'यथोत्तरं मुनीनां प्रामाण्यम्' इति न्यायानुसारेण भाष्यानुसारिण्येव स्वीकार्या भवति। भाष्ये क्रियालक्षणं प्रकरणप्राप्तं बहुधाऽनेकत्र लभ्यते, प्राधान्येन "भूवादयो धातवः"[5] इत्यत्रोक्तम्। अस्मिन् सूत्रभाष्ये महाव्याहृतिस्मरणरूपमङ्गलार्थं वकारागममुक्त्वा गणपठितत्वे सति क्रियावाचकत्वं धातुलक्षणं चिकीर्षुः सूत्र आदिग्रहणप्रयोजनमुद्दिश्य क्रियालक्षणभूमिकामारचयति भाष्यकारः। अष्टके यदि धातवः पठितास्तर्हि नार्थ आदिग्रहणेन, यथा- "मृडमृदगुधकुषमिलशवदवसः क्त्वा"[6] अत्रादिग्रहणं न करोति। अथापठिता न तरामर्थ आदिग्रहणेन। न ह्यपठिताः शक्या आदिग्रहणेन विशेषयितुमसम्बन्धात्। एवमाशङ्क्य समाधत्ते- "अस्ति च पाठो बाह्यश्च सूत्रात्"[7]। अतो गणपाठोक्ता भ्वादयः शब्दा धातुसंज्ञकाः स्युरित्येतदर्थमादिग्रहणमिति साधितम्।

**धातोर्लक्षणस्यावश्यकत्वम् –**

किञ्चाथापि धातुसंज्ञकशब्दसमानां वा नु दिवशब्दानां धातुसंज्ञानिरासाय प्रतिषेधो वक्तव्यः। यतो निपातप्रत्ययप्रातिपदिकानां धातुसंज्ञा न प्रसज्येत।

वा प्रभृतीनां धातुसंज्ञाया निपातादिभ्योऽपि तव्यदादय उत्पद्येरन्। नैष दोषः, "साधने तव्यदादयो विधीयन्ते साधनञ्च क्रियायाः, क्रियाभावात् साधनाभावः, साधनाभावात् सत्यामपि धातुसंज्ञायां तव्यदादयो न भविष्यन्ति। यथैव दिवं पश्येति बाह्यक्रियापेक्ष कर्मणि द्वितीया। एवं तव्यदादयोऽपि प्रातिपदिकाद् दिवशब्दाद् धातुसंज्ञकाद् भवेयुरिति न प्रत्युत, अन्तरङ्गधातुवाच्यक्रियापेक्षे साधने तव्यदादयः सावकाशा बाह्यक्रियापेक्ष साधने "दृशिक्रियापेक्षे साधने कर्मकारके कर्तरि वा गच्छत्यादौ तव्यदादयः, आदिग्रहणाच्छत्रादीनां ग्रहणम् नोत्पद्यन्ते।

तथैव च शकधृषेति स्वाथिकस्तुमुन्नपि नोत्पद्यतेऽनभिधानात्।

याः पश्येत्यादो "आतो धातोः[8]" इति लोपोऽपि न प्राप्नोति "आतोऽनाप" इति इति वातिकात्। ननु तथापि वा निपातस्य धातुसंज्ञायामर्थवत्[9] सूत्रेण प्रातिपदिकसंज्ञाभावे स्वादयो न स्युः, स्वाद्यभावेऽपदत्वात् प्रयोगार्हतैव न स्यात्।

अत आह- "निपातस्यानर्थकस्य प्रातिपदिकत्वम्"[10] इति वात्तिक-कृता सा भविष्यति। अनर्थकग्रहणं वार्त्तिकपाठे न करिष्यते। अनर्थकमित्यस्य द्योतकत्वं स्वीकृत्येयमुक्तिः, न तु लक्षणं परिवर्तयिष्यत इत्याशयः। "अचि श्नु धातु०"[11] इति सूत्रं न 'नु' प्रत्ययस्योवङादेशं शास्तीत्यतः 'नु' प्रत्ययस्य धातुसंज्ञायामपि नोवङादेशप्राप्तिः। अस्तु दिव्शब्दस्य "अर्थवत्"[12] सूत्रेण धातुत्वात् प्रातिपदिकसंज्ञाभावे स्वाद्युत्पत्तिर्न स्यादित्यपि न वाच्यम्, दिव्शब्दस्य प्रातिपदिकसंज्ञा भवतीत्याचार्यप्रवृत्तिर्ज्ञापयति, यदयं "दिव औत्"[13] इति सूचयति। इयमाचार्यप्रवृत्तिर्दिव्ब्दस्य प्रातिपदिकत्वं न ध्वनयति, प्रत्युत 'अक्षद्यूः' इत्यत्र कृत्तद्धितेति कृदन्तस्य प्रातिपदिकसंज्ञा द्योतिकेति चेन्न, दिव्धातुशब्दः सानुबन्धको दिब्शब्दो निरनुबन्धकः। एवञ्च निरनुबन्धकपरिभाषया दिव्शब्दस्य धातुसंज्ञेव न भवति, कुतः प्रातिपदिकसंज्ञाभावः? एवं दिव्शब्दस्य प्रातिपदिकसंज्ञासिद्धौ पुनराशङ्कते। एवमपि निरनुबन्धको दिव्शब्दो नास्तीति हेतोः सानुबन्धक एवायं विज्ञास्यते।अतः समानशब्दाप्रतिषेधजन्यो दोषस्तदवस्थ एव। इतश्चापरमपि दोषमुद्भावयति वार्त्तिककारः- "परिणामग्रहणं च" कर्त्तव्यमिति। अन्यथा धातुपाठे (संहितापाठे) भूशब्दो धातुसंज्ञो न पुनर्भ्वैध् इत्यत्र विनिगमनाविरहेऽ-नर्थापत्तिरपरिहार्या भवति।

**धातुलक्षणविचारः –**

एवमस्मिन्सूत्रभाष्य आदिग्रहणमवलम्ब्य व्याचिख्यासितस्य क्रियापदार्थस्य सलक्षणस्य जिज्ञासून् जिग्राहयिषया भूमिकामारचय्य वार्त्तिकद्वयेन दोषद्वयं प्रदर्श्य तन्निराकरणव्याजेनाह- "यदि पुनः क्रियावचनो धातुः" इत्येतल्लक्षणं क्रियेत। इह धातुलक्षणोक्तक्रिया-पदार्थं याथातथ्येन व्युत्पादयितुं का पुनः क्रिया ? इत्यत्रोत्तरं पठति- ईहा, का पुनरीहा ? इति प्रश्ने 'चेष्टा' इत्युत्तरति। ततोऽपि का पुनश्चेष्टा ? इति प्रश्ने व्यापार इत्युत्तरमुक्त्वा नहि पर्यायैः क्रियाया यथार्थस्वरूपं हृदयङ्गमं बोभवीतीत्यतः पदार्थस्वरूपं जिग्राहयिषुराह - क्रिया नामेयमत्यन्ताऽपरिदृष्टा। अशक्या क्रिया पिण्डीभूता निदर्शयितुं यथा गर्भो निलुंठितः। आख्यातपदवाच्या पूर्वापरीभूतावयवा साध्यमाना-वस्था, अत एव भूतभविष्यवर्तमानसदसदनेकावयवसमूहरूपा सद्वस्तु-विषयेन्द्रियग्राह्या न भवतीत्यर्थः, अवयवशस्तु प्रत्यक्षतामुपयान्ती गुणभूतानां भूतभविष्यद्वर्तमानसदसदनेकावयवानां समूहरूपाऽप्य-नुमीयते। यत्र यत्रावयवास्तत्र तत्रावयवीति नियतसाहचर्यादिना बुद्धिविषया तु समूहरूपापीत्यन्यदेतत्।

भाष्ये स्वनुमानगम्या क्रिया अनुमेया, तदनुमानाकारस्तु "इह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचतीत्येतद् भवति, कदाचिन्न भवति। अत्र कारकसमवधानकालिकपचत्यादिव्यवहारव्यतिरेक-प्रयोजकव्यतिरेकप्रतियोगित्वरूपं लक्षणमुक्तम्। तेन पचतीति प्रयोगे कारकरूपसाधनसमवधानकाले वर्तमाने क्रियाऽनुमीयते। तद् 'भवे पच' इत्युच्चार्यमाणे तु नानुमीयते, अथवा तत्र परिस्पन्दाभावे पचतीति प्रयोगो न भवति। "साध्यत्वं क्रियास्वरूपत्वम्" इत्याशयाविष्टं लक्षणम्। लिङ्गं तु न स्पष्टमुच्यत इति हृदि निधाय, यद्यपीतरभेदसाधने लक्षणमेव लिङ्गम्, तथापि लिङ्गान्तरं सूचितमेवमुच्यते भाष्ये- "यस्मिन् साधने सन्निहिते पचतीत्येतद् भवति सा नूनं क्रिया"[14]। यस्मिन् प्रयोगे कारकसमधानकाले पचतीति साधनविषयो भवति, न तु कारकस्वरूपो भवति, सोऽयं व्यापारः क्रिया।

किञ्चैवमपि मृगतृष्णिका विषयकजलज्ञानवत् पचतीत्येतदसत्य-विषयमेव ज्ञानमिति न निश्चितम्। ज्ञानं न वस्तुसत्तासाधकम्, असतोऽपि शशशृङ्गादेः शाब्दज्ञानदर्शनात्। अतः क्रियाविषयकं शाब्दज्ञानमसत्यमेवेति भावः। अत एव वस्तुसत्तासाधकं शब्दज्ञानात्मकं प्रयोगान्तरं प्रस्तौति- "यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति, सा नूनं क्रिया[15]"। अस्मिन् भाष्यवाक्ये देवदत्तकर्तृका, एतद्देशाधिकरणकाऽऽत्मधारणानुकूल क्रियोत्तरकालिकी पाटलिपुत्राधिकरणिकाऽऽत्मधारणानुकूला क्रियेत्यत्र वस्तुभूतदेवदत्त-कर्तृकारकनिष्ठो य एतद्देशाधिकरणकः पाटलिपुत्राधिकरणकप्रवृत्ति-विशेषः, सोऽपि वस्तुभूतः, स एव तु क्रियापदार्थः साध्यतयाऽभिधीयमानोऽनुमीयते। इममेवाशयं कैयटस्त्वेवमाह "देशान्तरप्राप्तिलक्षणेन कार्येणाबाधितेन (वस्तुभूतेन) क्रियाख्यं कारणमनुमीयते"[16]। प्रयोगेऽस्मिन्नन्यदपि विभाव्यते वैशिष्ट्यम्- यदनेन क्रियावचनाः पचादयोऽस्त्यादयश्च सामान्येन सिध्यन्ति।

ननु प्रत्यक्षाप्रवृत्तौ सम्बन्धग्रहणाभावात् कथं क्रियाविषयमनुमानं प्रवर्तत इति चेत्, न, धातुवाच्यस्य समूहस्य युगपदसन्निधानाद-प्रत्यक्षत्वेऽप्येकैकस्य तु क्षणस्य प्रत्यक्षत्वे बुद्ध्या तान् क्षणान् संकलय्य पचतीति प्रयुज्यते। स्मृत्या विषयीकृत्योपस्थिते समूहे सम्बन्धग्रहः, न हि प्रत्यक्षेणोपस्थित एव सम्बन्धग्रहनियमः। यदाऽप्येकस्मिन्क्षणे पचतीति प्रयोगस्तदा तत्र समूहारोपणम्। शब्दशक्तिस्वभावाच्चैकक्षणो नैव धातुवाच्यः।

ननु समूहस्याप्रत्यक्षत्वेऽप्येकक्षणस्य प्रत्यक्षसम्भवात् कियामात्रे चानुमानिकत्वकथन मयुक्तमित्याशङ्कायामुक्तं परिहारवाक्यं यदाऽपीति, तथा च तस्य (क्षणस्य, अवयवस्य वा) व्यवहारा-विषयत्वाद् व्यवहारविषयाः सर्वाऽनुमेयैव। ननु यदुच्यते, समूहारोप इति तदयुक्तम्। आरोपेऽपि वस्तुत एकस्यैव क्षणस्य क्रियात्वेन तत्र प्रत्यक्षत्वं व्यवहारविषयत्वं च दुर्वारम्। अत आह- शब्दशक्तिस्वभावाच्चैकक्षणो नैव धातुवाच्यः, पच्यादावधिश्रयणमात्रम्, अथवा न सोऽपि चैकक्षणात्मकस्तत्रापि हस्तप्रसारणचुल्ल्युपरिधार-णादयः क्षणा अवयवाः सन्त्येवेति। सोऽपि समूहरूप एवेति बोध्यम्। यस्तु तेषामप्यवयवः परमाणुप्रख्यः, स तु शब्दशक्तिस्वभावान्नैव वाच्यो नैव च प्रत्यक्षः।

**क्रियावचनताविचारः—**

अस्त्वेवमुक्तानुमानेन पचति भवत्यादि गणपाठोक्तधातुसाधारणस्य क्रियावचनत्वमप्यूहते “कथं पुनर्जायते क्रियावचनाः पचादय” इति। तदुत्तरं भाष्ये-”यदेतेषां करोतिना सामानाधिकरण्यम्”[17] भवति। अतस्ते क्रियावचना इति भावः। सामानाधिकरण्यं दर्शयति भाष्ये “किं करोति ? पचति, किं करिष्यति ? पक्ष्यति, किमकार्षीत् ? अपाक्षीदिति”[18]। अत्र प्रश्नोत्तर्यां सामान्यविशेषभावेन सामानाधिकरण्यात् क्रियाविशेषवचनाः पचादयः प्रतीयन्त इत्यर्थः। अत्रायं भाष्यकैयटयोराशयः- करोतिः कारकव्यापारमार्थकः प्रसिद्धः, तत्र यो व्यापारसामान्यवाची करोतिः तद्विशेषाः पचादयः, किं करोतीत्यस्य च यत् करोति तत् किमिति व्यापारविशेषविषयः प्रश्न एवार्थः। एवं च यन्निष्ठतया प्रश्नविषयक्रियायाः प्रतीतिस्तन्निष्ठतयैवोत्तरभूतपचतिशब्दवाच्यक्रियायाः प्रतीतिरिति तयोः सामानाधिकरण्यं स्पष्टम्। तथा च क्रियाप्रश्नजनकजिज्ञासायास्तद्विषयोत्तरेणेव (पचित्वक्रियाविशेषोत्तरेणैव) निरासात् तेषां पचादीनां क्रियावाचित्वम्। जिज्ञासोपशमेऽपि सामान्यविशेषभावेन क्रियात्वसामानाधिकरण्यमुपपद्यते। यदा तु ‘किं करोति’ इति पृष्टे - न करोत्यास्त एव केवलमिति प्रतिवचनम्, तदा व्यापारमात्रस्यावश्यंभावित्वाद् व्यापारविशेषविषयः प्रश्नः, प्रतिवचनं तु व्यापारविशेषनिराकरणेनेति बोद्धव्यम्। ‘किं करोति’ इत्यत्रेकस्मिन् कर्तरि कारके करोतिपचत्योर्वर्तमानकाले सामान्यविशेषभावेन सामानाधिकरण्यम्, तथैव भूतभविष्यतोरपि बोध्यम्।

अथैतावतायं निष्कर्षः सिध्यति यद् गणपठितत्वे सति क्रियावचना भूवादयः शब्दा धातुसंज्ञका भवन्ति।

देवदत्त इह भूत्वा पाटलिपुत्रे भवतीत्युदाहरणेन लोकप्रसिद्धस्य वस्तुभूतस्यार्थस्य सिद्धासिद्धत्वबोधको लोकप्रसिद्धो व्यापारः कर्तृसाधननिष्ठःसाध्यत्वेनाभिधीयमानः क्रियापदार्थः, यथेहात्मधारणानुकूलसत्तारूपोऽयो लोकसिद्धस्तस्यैव दैशिकतया परिर्वतितसत्तारूपताऽपि लोकसिद्धा, सा चापि सिद्धासिद्धरूपा। सैव चात्र साध्यतया वाक्येनाभिधीयते। एवञ्च साध्यतयाऽभिधीयमाना लोकसिद्धवस्त्वर्थभूता सत्ता पचादीनामुपलक्षणभूता क्रिया, ईहा, चेष्टा, व्यापारादिशब्दाभिधेया। साध्यत्वं चास्याः साधननिर्वर्त्यत्वाद् भर्तृहरिणोक्तं युक्तमपि सिद्धासिद्धत्वे चाप्यस्याः कालसाधनभेदादेतदेव हि लोकसिद्धं क्रियापदार्थस्वरूपम्।

**भाववचनताविचारः-**

वस्तुतस्तु वस्त्वर्थस्य सप्रकारकज्ञानगम्यत्वं साध्यत्वम्। तथा च लोकसिद्धवस्त्वर्थः सिद्धासिद्धरूपः साध्यत्वेनाभिधीयमानः सप्रकारकज्ञानगम्य आश्रितक्रमरूपः क्रियापदार्थः कालप्रातिपदिकादावतिव्याप्तिवारणाय गणपठितत्वमिति विशेषणम्। एवञ्च करोतिना पचादीनां भवत्यादीनां च सामानाधिकरण्यमपि चोपपाद्य गणपठितत्वे सति क्रियावचना भाववचनाश्च भूवादयो धातुसंज्ञकाः साधिताः[19]।

क्रियाविषये प्रश्ने - “भवति पचति, भवति पक्ष्यति, भवति अपाक्षीत्”[20] आत्मभरणवचनो भवतिः, तत्रात्मभरणं विरुद्धैकार्थसमवायैः पाचकत्वादिभिरविरुद्धैकार्थसमवायम्। यथा ‘शुक्लं रूपम्’ इति शुक्ले गुणे शुक्लत्वं रूपत्वं चास्तीति शुक्लादयो रूपवचनाः। एवं पचादयो भाववचनाः। आत्मभरणं पचि साधने कारके पाचकेऽप्यविरुद्धमिति सामानाधिकरण्यं स्पष्टम्। अथापि ‘किं करिष्यति? पक्ष्यति, किमकार्षीत्? अपाक्षीत्’ इत्यत्र यथा क्रियाविषये प्रश्ने करोतिपचत्योः सामानाधिकरण्ये कालिकत्वसामानाधिकरण्यादिर्न तथा भवतिपचत्योर्न सामानाधिकरण्यमित्याशङ्क्य पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति समाहितम्।

“भाववचना धातवः”[21] इति धातुलक्षणे षड्भावविकारप्रदर्शनपूर्वकं भवत्यादीनां सविशेषं करोतिना सामानाधिकरण्यं प्रदर्शितम्। सम्भावितदोषोत्सारणार्थं भावे कर्मणि कर्तरि च भावशब्दं व्युत्पाद्यान्ते वस्त्वर्थस्य परिस्पन्दस्वरूपः क्रियाशब्दवाच्यः, अपरिस्पन्दरूपो भावशब्दवाच्यः। तथा च परिस्पन्दापरिस्पन्दस्वरूपो वस्त्वर्थः साध्यत्वेनाभिधीयमानो गणपठितभूवादिशब्दवाच्य आश्रितक्रमरूपः क्रियापदार्थः, भूवादिसूत्रभाष्यान्तेऽयमेव क्रियापदार्थः समुपपादितः। प्रमाणं चान्त्यो भाष्यांशः “प्रत्येकं चादिशब्दः परिसमाप्यते, भ्वादय इति च वादय इति च। तद्यदा तावत् ‘क्रियावचनो धातुः’ इत्येष पक्षस्तदा ‘भू’ इत्यत्र य आदिशब्दः, स व्यवस्थायां वर्तते, ‘वा’ इत्यत्र य आदिशब्दः, स प्रकारे। ‘भू’ इत्येवमादयो ‘वा’ इत्येवंप्रकारा[22] इति। यदा तु ‘भाववचनो धातुः’ इत्येष पक्षस्तदा ‘वा’ इत्यत्र य आदिशब्दः, स व्यवस्थायाम्, ‘भू’ इत्यत्र य आदिशब्दः, स प्रकारे, ‘वा’ इत्येवमादयो ‘भू’ इत्येवंप्रकारा इति”। यत्र भूवेति क्रियावाचिनोऽन्योऽन्यं प्रकारतया विशेष्यतया चान्वयो दर्शितः। अयमेव भाष्यसम्मतः क्रियापदार्थः। अस्मिन् लक्षणे प्रत्ययनिपातप्रातिपदिकादावव्यास्यतिव्यास्यादिदोषगन्धलेशोऽपि नास्ति। अयमेव भाष्योक्तः क्रियापदार्थस्तत्रभवता भतृहरिणा क्रियासमुद्देशीयाद्यकारिकायां क्रोडीकृतः –

“यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते”॥[23]

वस्तुतो लोके परिस्पन्दापरिस्पन्दस्वरूपक्रियापदार्थसामान्यवाचको भाव एव शब्दः सुप्रसिद्धः, इमामेव लोकप्रसिद्धिमनुभूय नैरुक्ताः “भावप्रधानमाख्यातम्”२ इति वदन्ति, न पुनः क्रियाप्रधानमाख्यातमिति। क्रियापर्यायो भावशब्दः ‘यस्य च भावेन भावलदाणम्’ (पाणिनिसूत्रम् ३।३।३७) इति सूत्रकारमतेऽपि क्रियाशब्दपर्यायः। तथा च भवत्यादीनामपि क्रियावाचकत्वसिद्धिः सुनिश्चिता। एवं यद्यपि परिस्पन्दापरिस्पन्दरूपोभयवस्त्वर्थात्मानौ क्रियाभावशब्दो, तथापि शिष्यबुद्धिवैशद्यार्थं सिद्धान्तभाष्य उभावपि भेदेनोपन्यस्य ‘क्रियावाचका धातवः’, ‘भाववाचका धातवः’ इत्येव धातुलक्षणं कृतम्। एवं सति लोकप्रसिद्धपरिस्पन्दापरिस्पन्दरूपो-

भयवस्त्वर्थभेदवादिनोऽपि सुतरां सन्तुष्येयुः। तादृशोभयवस्त्वर्थवाचका धातव इत्येव धातुलक्षणं कृतम्। तेन लोकप्रसिद्धः सिद्धासिद्धवस्त्वर्थः क्रियाभावो वोच्यत इति सिध्यति, न तु कारकाणां प्रवृत्तिविशेषः क्रियापदार्थः पूर्वोक्तदोषापत्तेर्भाष्य उक्तः।

उपक्रमोपसंहारावभ्यासोऽपूर्वताफले।

अर्थवदोपपत्तौ च लिङ्गतात्पर्यनिर्णये॥

इति न्यायानुसारेण धातुलक्षणभाष्योपसंहारेऽस्माभिरुपर्युक्त एव वस्त्वर्थः क्रियाभावोभयसाधारणः शाब्दोऽर्थः। उपक्रमभाष्येऽपि "क्रियावचना धातवः, का पुनः क्रिया ? ईहा। का पुनरीहा ? चेष्टा, का पुनश्चेष्टा ? व्यापारः, सर्वथा भवान् शब्देनैव शब्दानाचष्टे, न किञ्चिदर्थजातं निदिशत्येवंजातीयका क्रिया" इत्यादितः "देवदत्त इह भूत्वा पाटलिपुत्रे भवति" इत्यनेन वस्त्वर्थभूतक्रियापदार्थव्याख्यानभाष्येणापि चास्मदुक्तक्रियापदार्थस्वरूपमुक्तम्। न त्वनेन स्वरूपवर्णनेन कारकाणां प्रवृत्तिविशेष इति क्रियालक्षणमुपपद्यते, पूर्वोक्तदोषापत्तेः। किञ्चात्र "साधनेषु सन्निहितेषु" इतीत आरभ्य 'देवदत्त इह भूत्वा पाटलिपुत्रे भवति, नूनं सा क्रिया" इत्यन्तं भाष्यमन्यथा व्याचक्षाणः कारकाणां प्रवृत्तिविशेषः क्रियेत्येकदेशिभाष्यमेव क्रियापदार्थलक्षणं ब्रुवाणश्च श्रीहेलाराजश्चिन्त्य एव। अत एव प्रदीपोद्योतयोः श्रीहेलाराजोक्तं क्रियालक्षणं न क्वाप्युक्तम्। अत एव लोकप्रसिद्ध एव वस्त्वर्थः सिद्धासिद्धरूप आख्यातेन प्रतीयमानः फलानुमेय आश्रितक्रमः साध्यत्वेनाभिधीयमानः क्रियापदार्थः। लोकप्रसिद्धिबलादुक्तस्वरूपमेव क्रियालक्षणम्, न तु तद्भिन्नं किञ्चिच्छास्त्रीयं लक्षणं भाष्य उक्तम्।

ननूक्तलक्षणेनापि कारकाणां प्रवृत्तिविशेष एव सिध्यति, उक्तलक्षणलक्षितायाः क्रियायाः कारकीयव्यापारस्वरूपविशेषदर्शनादिति चेत्, स्थूलदृशामुपकाराय कारकाणां प्रवृत्तिविशेषः क्रियेत्यार्थिकार्थरूपाशयकथनमुपयुज्यते, लक्षणं तु न सम्भवति। पदार्थोपस्थितपदजन्योपस्थितिनियमितत्वात् तिङ्विरहितपचादिप्रकृतिशब्दात् कारकपदार्थोपस्थितिरेवासम्भवा, कुतस्तत्प्रवृत्तिरूपक्रियापदार्थोपस्थितिः ? प्रकृतिशब्दात् कारकप्रवृत्तिरूपक्रियापदार्थोपस्थित्यभावे पचादिप्रकृतिशब्दानामनर्थकत्वसिद्धिः। अनर्थकत्वे च तेषां धातुसंज्ञैवासिद्धा भवति। धातुसंज्ञाभावे तिबादयो नोत्पद्येरन्। अर्थवतामेव भूवादिशब्दानां धातुसंज्ञास्मरणात् अर्थवत्सूत्रे धातुसंज्ञकप्रकृतिशब्दानामर्थवत्त्वाभ्युपगमात्। आख्यातादेव कारकपदार्थोपस्थितिर्भवति, नाख्यातप्रकृतिकात् पचादिशब्दात्, एवं पचादयोऽनर्थका धातुसंज्ञका एव न सिद्ध्यन्ति।

अतो धातुसंज्ञार्थमर्थवत्त्वसिद्धये प्रकृतिशब्दानां भूवादीनां लोकप्रसिद्धक्रियाभावोभयवाचकत्वरूपार्थवत्त्वं स्वीकार्यम्, न हि कारकप्रवृत्तिविशेषरूपक्रियावाचकत्वरूपमर्थवत्त्वम्,तस्याख्यातवाच्यत्वात्।

एवं हि लोकप्रसिद्धद्रव्यनिष्ठपरिष्पन्दापरिस्पन्दस्वरूपक्रियावाचिनो भूवादयो धातुगणपाठोक्ताः शब्दा धातुसंज्ञका इति यथोद्देशपक्षानुसारेण "भूवादयो धातवः" इति सूत्रं शिष्यमध्यापयितुमुपाध्यायः शक्नोति नान्यथा।

**सहायकग्रन्थसूची-**


व्याकरणमहाभाष्यम्-महर्षिपतञ्जलिः, चौखम्बा संस्कृत प्रतिष्ठान, २०२१

वैयाकरणसिद्धान्तकौमुदी-चौखम्भा सुरभारती प्रकाशन, वाराणसी, २०१७

वाक्यपदीयम्- भर्तृहरि, चौखम्भा ओरियन्टालिया, दिल्ली, २०२१

पाणिनीयशिक्षा- चौखम्भा सुरभारती प्रकाशन, वाराणसी, २०१४

परमलघुमञ्जूषा- नागेशभट्ट,बडौदा संस्कृत महाविद्यालय, १९६१


**सन्दर्भः**

[1]निरुक्तम्- १.४

[2]महाभाष्यम् - १।३।१,

[3]वाक्यपदीयम्, साधनसमुद्देशः, पृ० ८७

[4]वाक्यपदीयम्, साधनसमुद्देशः, पृ० ८७

[5]पा० सू०-१।३।१

[6]पा० सू० १।२।७

[7]महाभाष्यम् -१।३।१

[8]पा०सू० ७।४।१४०

[9]पा०सू० १।२।४५

[10] महाभाष्यम् -१।२।४५, वार्तिकम्-१०

[11] पा०सू० ६।४।७७

[12] पा०सू० १।२।४५

[13] पा०सू ७।१।८४

[14] महाभाष्यम्- १।३।१(वार्तिकम्)

[15] महाभाष्यम्- १।३।१

[16] महाभाष्यम्- १।३।१(प्रदीपे)

[17] महाभाष्यम्- १।३।१,(वार्त्तिके विचारः)

[18] महाभाष्यम्- १।३।१,(वार्त्तिके विचारः)

[19] महाभाष्यम्- १।३।१, वार्त्तिक-१०

[20] महाभाष्यम्- १।३।१, वार्त्तिक-१०

[21] महाभाष्यम्- १।३।१, वार्त्तिक-१०

[22] महाभाष्यम्- १।३।१, वार्त्तिक-१३

[23] वाक्यपदीये क्रियासमुद्देशः-१,